# Ganga Stotram

# ગઙ્ગાસ્તોત્રમ્

## Document Information

Text title : Ganga Stotram 7

File name : gangAstotram7.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

Ganga Stotram

# ગઙ્ગાસ્તોત્રમ્

ગઙ્ગે દર્શય તે રૂપં મુક્તિદં મુનિચિન્તિતમ્ ।
ગાયત્તારિણિ તે દૃષ્ટ્યા ચ્યવેત્કો નિજરૂપતઃ ॥ ૧॥

ગઙ્ગે ત્રેધાઽઘહન્ત્રીતિ તે કીર્તિ ર્દિક્ષુ વિસ્તૃતા ।
ગેયા યોગિમુનિધ્યેયા સદા ત્વં ગઙ્ગ આધિહે ॥ ૨॥

તિષ્યેંઽહસ્તરણં માતર્વરિષ્ઠે બત નાન્યતઃ ।
યો વૈરિઃ કામસંજ્ઞો મે પાહ્યતો રોષહેતુતઃ ॥ ૩॥

બ્રૂતે કૃત્સ્ન શ્રુતં ત્રાત્રી પેયોદાબાત્મિકેતિ યત્ ।
યા તૃષ્ણયા મતિર્ભ્રષ્ટાઽઽ ભ્યોદ્ભ્યો બાલઃ પુનાતુ તામ્ ॥ ૪॥

ધૌત ઉત્કૃષ્ટ એવાસ્તુ વિષ્ણુજેઽપિહિતાન્તરે ।
જગન્મતિક્ષાલકે ભૂષ્ણુસ્સન્સ્ત્વાં શાન્તિદેર્થયે ॥ ૫॥

નાસ્મત્તારક એવાન્યો લોકે વાચો મૃષા ન મે ।
નાન્તોઽનન્તેઽત્ર મેઽઘસ્ય કં બ્રૂયાં જ્ઞાનદેઽત્ર તુ ॥ ૬॥

શત્રૂન્દમય મે દેવિ સકલાનમૃતપ્રદે ।
તૈર્હિ દાન્તો વિમુક્તઃ સ્યાં ગતૈનાઃ સાધ્વ્યસંશયઃ ॥ ૭॥

રક્ષ યદ્યપિ પાપોઽહં ચ્છન્દોઽર્ચ્યે ગવિ જાહ્નવિ ।
પિતા કઃ કાઽપરામ્બા મે તિષ્યે તારઃ પરશ્ચ કઃ ॥ ૮॥

મન્ત્રાદ્યાક્ષરસહિત
દત્તાત્રેયો હરિઃ કૃષ્ણ ઉન્મત્તાનન્દદાયકઃ ।
મુનિર્દિગમ્બરો બાલઃપિશાચો જ્ઞાનસાગરઃ ॥

ગં ગે દ ર્શય તે રૂપં મુ ક્તિદં મુ નિચિન્તિતમ્ ।
ગા ય ત્તા રિણિ તે દૃષ્ટ્યા ચ્ય વેત્કો નિ જરૂપતઃ ॥ ૧॥

ગં ગે ત્રે ધાઽઘહન્ત્રીતિ તે કીર્તિ ર્દિ ક્ષુ વિસ્તૃતા ।

ગે યા યો ગિમુનિધ્યેયા સ દા ત્વં ગં ગ આધિહે ॥ ૨॥

તિ ષ્યેંડ હ સ્તરણં માત ર્વ રિષ્ઠે બ ત નાન્યતઃ ।
યો વૈ રિઃ કામસંજ્ઞો મે પા હ્યતો રો ષ હેતુતઃ ॥ ૩॥

બ્રૂ તે કૃ ત્સ્નશ્રુતં ત્રાત્રી પે યોદા બા ત્મિકેતિ યત્ ।
યા તૃ ષ્ણ યા મતિર્ભ્રષ્ટાઽઽ ભ્યો દ્ભ્યો બા લઃ પુનાતુ તામ્ ॥ ૪॥

ધો ત ઉ ત્કૃષ્ટ એવાસ્તુ વિ ષ્ણુજેઽ પિ હિતાન્તરે ।
જ ગ ન્મ તિ ક્ષાલકે ભૂ ષ્ણુ સ્સન્સ્ત્વાં શા ન્તિદેર્થયે ॥ ૫॥

ના સ્મ ત્તા રક એવાન્યો લો કે વા ચો મૃષા ન મે ।
નાં તોઽ ન ન્તેઽત્ર મેઽઘસ્ય કં બ્રૂયાં જ્ઞા નદેઽત્ર તુ ॥ ૬॥

શ ત્રૂ ન્દ મય મે દેવિ સ કલા- ન મૃતપ્રદે ।
તૈ ર્હિ દા ન્તો વિમુક્તઃ સ્યાં ગ તૈનાઃ સા ધ્વ્યસંશયઃ ॥ ૭॥

ર ક્ષ ય દ્યપિ પાપોઽહં ચ્છ ન્દોઽર્ચ્યે ગ વિ જાહ્નવિ ।
પિ ક્ષા કઃ કાઽપરામ્બા મે તિ ષ્ઠે તા રઃ પરશ્ચ કઃ ॥ ૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં ગઙ્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

*Ganga Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*